# vAlmIki rAmAyaNa bAlakANDa (ch 75,76)

# વાલ્મીકિ રામાયણ બાલકાણ્ડ

## Document Information

Text title : vAlmIki rAmAyaNa bAlakANDa

File name : chp75_76.itx

Category : raama

Location : doc_raama

Transliterated by : Shrisha Rao shrao at dvaita.org May 16, 1996

Proofread by : Shrisha Rao shrao at dvaita.org May 16, 1996

Latest update : May 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 28, 2021

*sanskritdocuments.org*

# વાલ્મીકિ રામાયણ બાલકાણ્ડ

॥ ધ્યાન શ્લોકાઃ ॥

શુક્લાંબરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્સર્વવિઘ્નોપશાંતયે ॥ ॥

સર્વવિઘ્નપ્રશમનં સર્વસિદ્ધિકરં પરમ્ ।
સર્વજીવપ્રણેતારં વંદે વિજયદં હરિમ્ ॥ ॥

યત્ર યત્ર રઘુનાથકીર્તનં તત્ર તત્ર કૃતમસ્તકાઞ્જલિમ્ ।
બાષ્પવારિપરિપૂર્ણલોચનં મારુતિં નમત રાક્ષસાંતકમ્ ॥ ॥

વેદવેદ્યે પરે પુંસિ જાતે દશરથાત્મજે ।
વેદઃ પ્રાચેદસાદાસીત્ સાક્ષાદ્રામાયણાત્મના ॥ ॥

આપદામપહર્તારં દાતારં સર્વસમ્પદામ્ ।
લોકાભિરામં શ્રીરામં ભૂયો ભૂયો નમામ્યહમ્ ॥ ॥

તદુપગત સમાસસન્ધિ યોગમ્ ।
  સમમધુરોપનતાર્થવાક્યબદ્ધમ્ ।
રઘુવરચરિતં મુનિપ્રણીતમ્ ।
  દશશિરશ્ચ વધં નિશામયદ્ધ્વમ્ ॥ ॥

વૈદેહીસહિતં સુરદ્રુમતલે હૈમે મહામણ્ડપે ।
  મધ્યે પુષ્પકમાસને મણિમયે વીરાસને સુસ્થિતમ્ ।
અગ્રે વાચયતિ પ્રભઞ્જનસુતેતત્ત્વમ્મુનિભ્યઃ પરમ્ ।
  વ્યાખ્યાન્તં ભરતાદિભિઃ પરિવૃતં રામં ભજે શ્યામલમ્ ॥ ॥

વાલ્મીકેર્મુનિસિંહસ્ય કવિતા વનચારિણઃ ।
શ્રુણ્વન્રામકથાનાદં કો ન યાતિ પરાં ગતિમ્ ॥ ॥

હનૂમાનઞ્જનાસૂનુઃ વાયુપુત્રો મહાબલઃ ।

રામેષ્ટઃ ફલ્ગુણસખઃ પિઙ્ગાક્ષોઽમિતવિક્રમઃ ॥ ॥

ઉદધિક્રમણશ્ચૈવ સીતાસંદેશ હારકઃ ।
લક્ષ્મણપ્રાણદાતા ચ દશગ્રીવસ્ય દર્પહા ॥ ॥

મહાવ્યાકરણાંભોધિ મંથમાનસમંદરમ્ ।
કવયન્તં રામકીર્ત્યા હનૂમંતમુપાસ્મહે ॥ ॥

વાયુર્ભીમો ભીમનાદો મહૂજાઃ સર્વેશાં ચ પ્રાણિનાં પ્રાણભૂતઃ ।
અનાવૃત્તિર્દેહિનાં દેહપાતે તસ્માદ્વાયુર્દેવદેવો વિશિષ્ટઃ ॥ ॥

જ્ઞાને વિરાગે હરિભક્તિભાવે ધૃતિસ્થિતિપ્રાણબલેષિ યોગે ।
બુદ્ધૌ ચ નાન્યો હનુમત્સમાનઃ પુમાન્ કદાચિત્ ક્વચકશ્ચ નૈવ ॥ ॥

વાતેન કુન્ત્યાં બલવાન્ સ જાતઃ શૂરસ્તપસ્વી દ્વિષતાં નિહંતા ।
સત્યે ચ ધર્મે ચ રતઃ સદૈવ પરાક્રમે શત્રુભિરપ્રધૃષ્યઃ ॥ ॥

મનોજવં મારુતતુલ્યવેગં જિતેન્દ્રિયં બુદ્ધિમતાંવરિષ્ઠમ્ ।
વાતાત્મજં વાનરયૂથમુખ્યં શ્રીરામદૂતં શિરસા નમામિ ॥ ॥

ઉલ્લઙ્ઘ્ય સિન્ધોઃ સલિલં સલીલં યઃ શોકવહ્નિં જનકાત્મજાયાઃ ।
આદાય તેનૈવ દદાહ લઙ્કાં નમામિ તં પ્રાઞ્જલિરાઞ્જનેયમ્ ॥ ॥

આઞ્જનેયમતિપાટલાનનં કાઞ્ચનાદ્રિકમનીયવિગ્રહમ્ ।
પારિજાતતરુમૂલવાસિનં ભાવયામિ પવમાનનંદનમ્ ॥ ॥

યઃ સર્વગુણસમ્પૂર્ણઃ સર્વદોષ વિવર્જિતઃ ।
પ્રીયતાં પ્રીતયેવાલં વિષ્ણુર્મે પરમઃ સુહૃત્ ॥ ॥

સૂક્તિરત્નાકરે રમ્યે મૂલરામાયણાર્ણવે ।
વિહરન્તો મહીયાંસઃ પ્રિયંતાં ગુરવો મમ ॥ ॥

બુદ્ધિર્બલં યશો ધૈર્યં નિર્ભયત્વં અરોગતા ।
અજાડ્યં વાક્પટુત્વં ચ હનૂમત્સ્મરણાદ્ભવેત્ ॥ ॥

॥ સઙ્કલ્પ ॥

શ્રી સીતાલક્ષ્મણભરતશત્રુઘ્નહનુમત્સમેત શ્રી રામચંદ્ર પ્રભોઃ
પ્રસાદેન અસ્મચ્ચિન્તિત સકલાભીષ્ટસિદ્ધ્યર્થં ભાર્ગવવિજયાત્મક
શ્રીમદ્રામાયણઘટ્ટપારાયણમહં કરિષ્યે ।

॥ અથ પઞ્ચસપ્તતિતમઃ સર્ગઃ ॥

રામ દાશરથે રામો વિર્યં તે શ્રૂયતેઽદ્ભુતમ્ ।
ધનુષો ભેદનં ચૈવ નિખિલેન મયા શ્રુતમ્ ॥ ૧॥

તદદ્ભુતમચિન્ત્યં ચ ભેદનં ધનુષસ્ત્વયા ।
તચ્છ્રુત્વાહમનુપ્રાપ્તો ધનુર્ગૃહ્યાપરં શુભમ્ ॥ ૨॥

તદિદં ઘોરસઙ્કાશં જામદગ્ન્યં મહદ્ધનુઃ ।
પૂજયસ્વ શરેણૈવ સ્વબલં દર્શયસ્વ ચ ॥ ૩॥

તદહં તે બલં દૃષ્ટ્વા ધનુષોઽસ્ય પ્રપૂરણે ।
દ્વન્દ્વયુદ્ધં પ્રદાસ્યામિ વીર્યશ્ળાઘ્યસ્ય રાઘવ ॥ ૪॥

તસ્ય તદ્ વચનં શ્રુત્વા રાજા દશરથસ્તદા ।
વિષણ્ણવદનો દીનઃ પ્રાઞ્જલિર્વાક્યમબ્રવીત્ ॥ ૫॥

ક્ષત્રરોષાત્ પ્રશાન્તસ્ત્વં બ્રાહ્મણશ્ચ મહાયશાઃ ।
બાલાનાં મમ પુત્રાણામભયં દાતુમર્હસિ ॥ ૬॥

ભાર્ગવાણાં કુલે જાતઃ સ્વાધ્યાયવ્રતશાલિનામ્ ।
સહસ્રાક્ષે પ્રતિજ્ઞાય શસ્ત્રં નિક્ષિપ્તવાનસિ ॥ ૭॥

સ ત્વં ધર્મપરો ભૂત્વા કશ્યપાય વસુંધરામ્ ।
દત્વા વનમુપાગમ્ય મહેન્દ્રકૃતકેતનઃ ॥ ૮॥

મમ સર્વવિનાશાય સમ્પ્રાપ્તસ્ત્વં મહામુને ।
ન ચૈકસ્મિન્ હતે રામે સર્વે જીવામહે વયમ્ ॥ ૯॥

બ્રુવત્યેવં દશરથે જામદગ્ન્યઃ પ્રતાપવાન્ ।
અનાદૃત્યૈવ તદ્વાક્યં રામમેવાભ્યભાષત ॥ ૧૦॥

ઇમે દ્વે ધનુષી શ્રેષ્ઠે દિવ્યે લોકાભિવિશ્રુતે ।
દૃઢે બલવતી મુખ્યે સુકૃતે વિશ્વકર્મણા ॥ ૧૧॥

અતિસૃષ્ટં સુરૈરેકં ત્રયમ્બકાય યુયુત્સવે ।
ત્રિપુરઘ્નં નરશ્રેષ્ઠ ભગ્નં કાકુત્સ્થ યત્ત્વયા ॥ ૧૨॥

ઇદં દ્વિતીયં દુર્ધર્ષં વિષ્ણોર્દત્તે સુરોત્તમૈઃ ॥ ૧૩॥

તદિદં વૈષ્ણવં રામ ધનુઃ પરપુરઞ્જયમ્ ।
સમાનસારં કાકુત્સ્થ રૌદ્રેણ ધનુષા ત્વિદં ॥ ૧૪॥

તદા તુ દેવતાઃ સર્વાઃ પૃચ્છન્તિ સ્મ પિતામહમ્ ।
શિતિકણ્ઠસ્ય વિષ્ણોશ્ચ બલાબલનિરીક્ષયા ॥ ૧૫॥

અભિપ્રાયં તુ વિજ્ઞાય દેવતાનાં પિતામહઃ ।
વિરોધં જનયામાસ તયોઃ સત્યવતાં વરઃ ॥ ૧૬॥

વિરોધે ચ મહદ્યુદ્ધમભવદ્ રોમહર્ષણમ્ ।
શિતિકણ્ઠસ્ય વિષ્ણોશ્ચ પરસ્પરજિગીષિણોઃ ॥ ૧૭॥

તદા તુ જૃમ્ભિતં શૈવં ધનુર્ભીમપરાક્રમમ્ ।
હુઙ્કારેણ મહાદેવઃ સ્તમ્ભિતોઽથ ત્રિલોચનઃ ॥ ૧૮॥

દેવૈસ્તદા સમાગમ્ય સર્ષિસઙ્ઘૈઃ સચારણૈઃ ।
યાચિતૌ પ્રશમં તત્ર જગ્મતુસ્તૌ સુરોત્તમૌ ॥ ૧૯॥

જૃમ્ભિતં તદ્ ધનુર્દૃષ્ટ્વા શૈવં વિષ્ણુપરાક્રમૈઃ ।
અધિકં મેનિરે વિષ્ણું દેવાઃ સર્ષિગણાસ્તદા ॥ ૨૦॥

ધનૂ રુદ્રસ્તુ સઙ્ક્રુદ્ધો વિદેહેષુ મહાયશાઃ ।
દેવરાતસ્ય રાજર્ષેઃ દદૌ હસ્તે સસાયકં ॥ ૨૧॥

ઇદં ચ વૈષ્ણવં રામ ધનુઃ પરપુરઞ્જયમ્ ।
ઋચીકે ભાર્ગવે પ્રાદાદ્ વિષ્ણુઃ સંન્યાસમુત્તમમ્ ॥ ૨૨॥

ઋચીકસ્તુ મહાતેજાઃ પુત્રસ્યાપ્રતિકર્મણઃ ।
પિતુર્મમ દદૌ દિવ્યં જમદગ્નેર્મહાત્મનઃ ॥ ૨૩॥

ન્યસ્તશસ્ત્રે પિતરિ મે તપોબલસમન્વિતે ।
અર્જુનો વિદધે મૃત્યું પ્રાકૃતાઃ બુદ્ધિમાસ્થિતઃ ॥ ૨૪॥

વધમપ્રતિરૂપં તુ પિતુઃ શ્રુત્વા સુદારુણમ્ ।
ક્ષત્રમુત્સાદયન્ રોષાત્ જાતં જાતમનેકશઃ ॥ ૨૫॥

પૃથિવીં ચાખિલાં પ્રાપ્ય કશ્યપાય મહાત્મને ।
યજ્ઞસ્યાન્તે તદા રામ દક્ષિણાં પુણ્યકર્મણે ॥ ૨૬॥

દત્ત્વા મહેન્દ્રનિલયસ્તપોબલસમન્વિતઃ ।
શ્રુતવાન્ ધનુષો ભેદં તતોઽહં દ્રુતમાગતઃ ॥ ૨૭॥

તદિદં વૈષ્ણવં રામ પિતૃપૈતામહં મહત્ ।

ક્ષત્રધર્મં પુરસ્કૃત્ય ગૃહ્ણીષ્વ ધનુરુત્તમમ્ ॥ ૨૮॥

યોજયસ્વ ધનુઃશ્રેષ્ઠે શરં પરપુરઞ્જયમ્ ।
યદિ શક્નોષિ કાકુત્સ્થ દ્વન્દ્વં દાસ્યામિ તે તતઃ ॥ ૨૯॥

॥ ઇત્યાર્ષે શ્રીમદ્રામાયણે વાલ્મીકીયે આદિકાવ્યે ॥

॥ બાલકાણ્ડે પઞ્ચસપ્તતિતમઃ સર્ગઃ ॥

॥ અથ ષટ્સપ્તતિતમઃ સર્ગઃ ॥

શ્રુત્ત્વા તદ્ જામદગ્ન્યસ્ય વાક્યં દાશરથિસ્તદા ।
ગૌરવાદ્યન્ત્રિતકથઃ પિતૂ રામમથાબ્રવીત્ ॥ ૧॥

કૃતવાનસિ યત્ કર્મ શ્રુતવાનસ્મિ ભાર્ગવ ।
અનુરુધ્યામહે બ્રહ્મન્ પિતુરાનૃણ્યમાસ્થિતઃ ॥ ૨॥

વીર્યહીનમિવાશક્તં ક્ષત્રધર્મેણ ભાર્ગવ ।
અવજાનાસિ મે તેજઃ પશ્ય મેઽદ્ય પરાક્રમમ્ ॥ ૩॥

ઇત્યુક્ત્વા રાઘવઃ ક્રુદ્ધો ભાર્ગવસ્ય શરાસનમ્ ।
શરં ચ પ્રતિજગ્રાહ હસ્તાલ્લઘુપરાક્રમઃ ॥ ૪॥

આરોપ્ય તદ્ધનૂ રામઃ શરં સજ્યં ચકાર હ ।
જામદગ્ન્યં તતો રામં રામઃ ક્રુદ્ધોઽબ્રવીદ્વચઃ ॥ ૫॥

બ્રાહ્મણોઽસીતિ પૂજ્યો મે વિશ્વામિત્રકૃતેન ચ ।
તસ્માચ્છક્તો ન તે રામ મોક્તું પ્રાણહરં શરમ્ ॥ ૬॥

ઇમાં પાદગતિં રામ તપોબલસમાર્જિતાન્ ।
લોકાનપ્રતિમાન્ વાતે હનિષ્યામિ યદિચ્છસિ ॥ ૭॥

ન હ્યયં વૈષ્ણવો દિવ્યઃ શરઃ પરપુરઞ્જયઃ ।
મોઘઃ પતતિ વીર્યેણ બલદર્પવિનાશનઃ ॥ ૮॥

વરાયુધધરં રામં દ્રષ્ટું સર્ષિગણાઃ સુરાઃ ।
પિતામહં પુરસ્કૃત્ય સમેતાસ્તત્ર સઙ્ઘશઃ ॥ ૯॥

ગન્ધર્વાપ્સરસશ્ચૈવ સિદ્ધચારણકિન્નરાઃ ।
યક્ષરાક્ષસનાગાશ્ચ તદ્ દ્રષ્ટું મહદદ્ભુતમ્ ॥ ૧૦॥

જડીકૃતે તદા લોકે રામે વરધનુર્ધરે ।

નિર્વીર્યો જામદગ્ન્યોઽસૌ રામો રામમુદૈક્ષત ॥ ૧૧॥

તેજોઽભિહતવીર્યત્વાત્ જામદગ્ન્યો જડીકૃતઃ ।
રામં કમલપત્રાક્ષં મન્દં મન્દમુવાચ હ ॥ ૧૨॥

કશ્યપાય મયા દત્તા યદા પૂર્વં વસુંધરા ।
વિષયે મે ન વસ્તવ્યમિતિ માં કશ્યપોઽબ્રવીત્ ॥ ૧૩॥

સોઽહં ગુરુવચઃ કુર્વન્ પૃથિવ્યાં ન વસેઽનિશમ્ ।
કૃતા પ્રતિજ્ઞા કાકુત્સ્થ કૃતા ભૂઃ કાશ્યપસ્ય હ ॥ ૧૪॥

તાદિમાં ત્વંગતિં વીર હન્તું નાર્હસિ રાઘવ ।
મનોજવં ગમિષ્યામિ મહેન્દ્રં પર્વતોત્તમમ્ ॥ ૧૫॥

લોકાસ્ત્વપ્રતિમા રામ નિર્જિતાસ્તપસા મયા ।
જહિ તાઞ્છરમુખ્યેન મા ભૂત્ કાલસ્ય પર્યયઃ ॥ ૧૬॥

અક્ષયં મધુહન્તારં જાનામિ ત્વાં સુરોત્તમમ્ ।
ધનુષોઽસ્ય પરામર્શાત્ સ્વસ્તિ તેઽસ્તુ પરંતપ ॥ ૧૭॥

એતે સુરગણાઃ સર્વે નિરીક્ષન્તે સમાગતાઃ ।
ત્વામપ્રતિમકર્માણમપ્રતિદ્વન્દ્વમાહવે ॥ ૧૮॥

ન ચેયં મમ કાકુત્સ્થ વ્રીડા ભવિતુમર્હતિ ।
ત્વયા ત્રૈલોક્યનાથેન યદહં વિમુખીકૃતઃ ॥ ૧૯॥

શરમપ્રતિમં રામ મોક્તુમર્હસિ સુવ્રત ।
શરમોક્ષે ગમિષ્યામિ મહેન્દ્રં પર્વતોત્તમમ્ ॥ ૨૦॥

તથા બ્રુવતિ રામે તુ જામદગ્ન્યે પ્રતાપવાન્ ।
રામો દાશરથિઃ શ્રીમાંશ્ચિક્ષેપ શરમુત્તમમ્ ॥ ૨૧॥

સ હતાન્ દૃશ્ય રામેણ સ્વાઁલ્લોકાંસ્તપસાર્જિતાન્ ।
જામદગ્ન્યો જગામાશુ મહેન્દ્રં પર્વતોત્તમમ્ ॥ ૨૨॥

તતો વિતિમિરાઃ સર્વા દિશશ્ચોપદિશસ્તથા ।
સુરાઃ સર્ષિગણા રામં પ્રશશંસુરુદાયુધમ્ ॥ ૨૩॥

રામં દાશરથિં રામો જામદગ્ન્યઃ પ્રશસ્ય ચ ।
તતઃ પ્રદક્ષિણં કૃત્વા જગામાત્મગતિં પ્રભુઃ ॥ ૨૪॥

॥ ઇત્યાર્ષે શ્રીમદ્રામાયણે વાલ્મીકીયે આદિકાવ્યે ॥

॥ બાલકાણ્ડે ષટ્સપ્તતિતમઃ સર્ગઃ ॥

॥ ભારતીરમણમુખ્યપ્રાણાંતર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ॥

Encoded and proofread by Shrisha Rao shrao at dvaita.org

*vAlmIki rAmAyaNa bAlakANDa (ch 75,76)*

pdf was typeset on May 28, 2021

Please send corrections to *sanskrit@cheerful.com*